भपतिः, पुं, ( भानां नक्षत्राणां पतिः । ) चन्द्रः । इति हेमचन्द्रः ॥

भम्भः, पुं (भम् इत्यव्यक्तशब्देन भातीति । भा+कः ।) मक्षिका । इति शब्दरत्नावली ॥ धूमः । इति त्रिकाण्डशेषः ॥

भम्भरालिका, स्त्री, ( भमित्यव्यक्तशब्दस्य भरं बाहुल्यमालाति गृह्णातीति । आ+ला+कः । गौरादित्वात् ङीष् । ततः स्वार्थे कन् टाप् पूर्ब्बस्य ह्रस्वत्वम् ।) भङ्कारी । इति त्रिकाण्डशेषः ॥ डाँश इति भाषा ॥

भम्भराली, स्त्री, ( भमित्यव्यक्तशब्दस्य भरमालातीति । आ+ला+कः । गौरादित्वात् ङीष् ।) मक्षिका । इति त्रिकाण्डशेषः ॥

भम्भासारः, पुं, मगधराजविशेषः । तत्पर्य्यायः । श्रेणिकः २ । इति हेमचन्द्रः ॥

भयं, क्ली, (भी+"एरच् ।" ३ । ३ । ५६ । इत्यच "भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम् ।"इति वार्त्तिकोक्त्या अपादाने अच् ।) बिभेत्यस्मात् तत् । इति भरतः ॥ अस्य लक्षणं यथा, "रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम् ॥"

इति साहित्यदर्पणे ३ परिच्छेदः ॥

अपि च । रागविषयस्य विनाशके समुपस्थिते तन्निवारणासामर्थ्यमात्मनो मन्यमानस्य दैन्यात्मकश्चित्तवृत्तिविशेषो भयम् । इति भगवद्गीतायां २ ,अध्याये मधुसूदनसरस्वती ॥ अन्यच्च । परतः स्वानिष्टसम्भावना भयम् । यथा । चाण्डाद्बिभेति शाणाधीनत्वेन स्वीयमरणं सम्भावयति । इति २ व्युत्पत्तिवादे गदाधरभट्टाचार्य्यः । तत्पर्य्यायः । दरः २ त्रासः ३ भीतिः ४ भीः ५ साध्वसम् ६ । इत्यमरः ।१ । ७ । २१ ॥ वद्रासः ७ साधुसंभवः ८ प्रतिभयम् ९ । इति शब्दरत्नावली ॥ आतङ्कः १० आशङ्का ११ भिया १२ । इति हेमचन्द्रः ॥ आगते भये अभीतवत् स्थातव्यम् । यथा,—

"तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।
उत्पन्ने तु भये तीव्रे स्थातव्यं तैरभीतवत् ॥"

इति गारुडे नीतिसारे ११५ अध्यायः ॥

कुब्जकपुष्पम् । घोरे, त्रि । इति मेदिनी । ये, ४१ ॥ पुं रोगः । इति राजनिर्घण्टः ॥ (निरृतेः पुत्त्रभेदः । यथा, महाभारते । १ । ६६ । ५५-५६ ।

"तस्यापि निरृतिर्भार्य्या नैरृता येन राक्षसाः ।
घोरास्तस्यास्त्रयः पुत्त्राः पापकर्म्मरताः सदा ॥
भयो महाभयश्चैव मृत्युर्भूतान्तकस्तथा ।
न तस्य भार्य्या पुत्त्रो वा कश्चिदस्त्यन्तको हि सः ॥"

द्रोणस्य वसोरभिमतिनामिकायां पत्न्यां जातः पुत्त्रभेदः । यथा, भागवते । ६ । ६ । ११ ।

"द्रोणस्याभिमतेः पत्न्या हर्षशोकभयादयः ॥"

यवनराजविशेषः । यथा, भागवते ।४।२७।२३।

"ततो विहृतसङ्कल्पा कन्यका यवनेश्वरम् ।
मयोपदिष्टमासाद्य वव्रे नाम्ना भयं पतिम् ॥")

भयङ्करं, त्रि, ( भयं करोतीति । भय+कृ+"मेघर्त्तिभयेषु कृञः ।"३ । २ । ४३ । इति खच् । मुमृच ।) भयजनकम् । तत्पर्य्यायः । भैरवम् २ दारुणम् ३ भीषणम् ४ भीष्मम् ५ घोरम् ६ भीमम् ७ भयानकम् ८ प्रतिभयम् ९ । इत्यमरः । १ । ७ । २० ॥ भयावहम् १० । इति हेमचन्द्रः ॥ (यथा, मार्कण्डेयपुराणे । १४ । ८६ ।

"वृकैर्भयङ्करैः पृष्ठं नित्यमस्योपभुज्यते ॥")

पुं, डुण्डुलपक्षी । इति राजनिर्घण्टः ॥

भयडिण्डिमः, पुं, ( भयाय शत्रुभयजननाय डिण्डिमः । ) संग्रामपटहः । इति पुराणम् ॥

भयद्रुतः, त्रि, ( द्रु+कर्त्तरि क्तः । भयेन द्रुतः । ) भीत्या पलायितः । तत्पर्य्यायः । कान्दिशीकः २ । इत्यमरः । ३ । १ । ४२ ॥

भयनाशिनी, स्त्री, ( भयं रोगभयं नाशयतीति । भय+नश्+णिच्+णिनिः । ) त्रायमाणा लता । इति राजनिर्घण्टः ॥ भयनाशकर्त्री च ॥

भयभीतः, त्रि, ( भयेन भीतः । ) त्रासेनातङ्कितः । यथा, वह्निपुराणे शिविराजोपाख्याने ।

"एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ।
नातो गुरुतरो धर्म्मः कश्चिदन्योऽस्ति खेचर ! ॥

भयभ्रष्टः, त्रि, ( भयेन भ्रष्टः । ) भयद्रुतः । इति जटाधरः ॥

भयानकः, पुं, ( बिभेत्यस्मादिति । भी+"आनकः शीङ्भियः ।"उणा० । ३ । ८२ । इति आनकः ।) व्याघ्रः । राहुः । रसविशेषः । इति मेदिनी । के,२०५॥ स तु शृङ्गाराद्यष्टरसान्तर्गतषष्ठरसः । तस्य लक्षणं यथा,—

"भयानको भयस्थायिभावः कालाधिदैवतः ।
स्त्री नीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥
यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम् ।
चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः ॥
अनुभावोऽत्र वैवर्ण्यं गद्गदस्वरभाषणम् ।
प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः ॥
जुगुप्सावेगसंमोहसंत्रासग्लानिदीनताः ।
शङ्कापस्मारसंभ्रान्तिमृत्य्वाद्या व्यभिचारिणः ॥"

उदाहरणं यथा,—

"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपामन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ॥"

इति साहित्यदर्पणे ३ परिच्छेदः ॥

भयानकः, त्रि, ( भी+आनकः । ) भयङ्करः । इत्यमरः । १ । ७ । २० ॥ ( यथा, भगवद्गीतायाम् । ११ । २७ ।

"वक्त्राणि ते त्वरमाणा विशन्ति
दंष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु
संदृश्यन्ते चूर्णितैरुत्तमाङ्गैः ॥"

भयापहः, पुं, ( भयं अपहन्तीति । हन्+"अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) राजा । इति त्रिकाण्डशेषः ॥ ( भयनाशके, त्रि ॥ )

भयावहः, त्रि, ( आवहतीति । आ+वह्+अच् । भयस्यावहः इति । ) भयङ्करः । इति हेमचन्द्रः ॥ (तथा, भगवद्गीतायाम् । ३ । ३५ ।

"श्रेयान् स्वधर्म्मो विगुणः परधर्म्मात् स्वनुष्ठितात् ।
स्वधर्म्मे निधनं श्रेयः परधर्म्मो भयावहः ॥")

भरः, पुं, ( भरतीति । भृ+पचाद्यच् । ) अतिशयः । इत्यमरः । १ । २ । ६९ ॥ (यथा, गीतगोविन्दे । ४१ ;

"पीनपयोधरभारभरेण हरिं परिरभ्य सरागम् ॥"

भारः । यथा, भागवते । १ । ३ । २३ ।

"एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनी ।
रामकृष्णाविति भुवो भगवानहरद्भरम् ॥")

भरणकर्त्तरि, त्रि । (यथा, ऋग्वेदे ।१०।१००।२।

"भराय सु भरत भागमृत्वियं
प्र वायवे शुचिपे क्रन्ददिष्टये ॥"

"भराय सर्व्वेषां पोषकाय ।" इति तद्भाष्ये सायनः ॥ संग्रामः । यथा, ऋग्वेदे ।४।३८।५।

"उत स्मैनं वस्त्रमथिं न तायु-
मनुक्रोशन्ति क्षितयो भरेषु ॥"

"भरेषु संग्रामेषु ।" इति तद्भाष्ये सायनः ॥)

भरटः, पुं, (बिभर्त्तीति । भृ+"जनिदाच्युसृवृमदिशमिनमिभृञ्भ्य इत्वन्निति ।" उणा० । ४ । १०४ । इति अटच् ।) कुम्भकारः । इत्युणादिकोषः ॥

भरणं, क्ली, ( भ्रियतेऽनेनेति । भृ+करणे ल्युट् ।) वेतनम् । भृतिः । इति मेदिनी । णे, ६८ ॥ ( भृ+भावे ल्युट् । ) पोषणम् । यथा,—

"भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ।
नरकं पीड़ने चास्य तस्माद्यत्नेन तं भरेत् ॥"

इति दायभागः ॥

भरणः, पुं, (भरतीति । भृ+क्यु ।) भरणीनक्षत्रम् । इति शब्दरत्नावली ॥

भरणी, स्त्री, ( भरण+गौरादित्वात् ङीष् । ) घोषकलता । इति मेदिनी । णे, ६८ ॥ अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतद्वितीयनक्षत्रम् । तत्पर्य्यायः । यमदैवता २ । इति हेमचन्द्रः ॥ सा तारकात्रयमितत्रिकोणाकृतिः । तस्या अधिष्ठात्री दैवता यमः । यथा,—

"तारकात्रयमिते त्रिकोणके
मध्यगे द्विविषदध्वनी यमे ।
पङ्कजाक्षिगणिताः कुलीरतः
सायकाक्षिभुजसंख्यकाः कलाः ॥

इं ३ । ४५ । इति कालिदासकृतरात्रिलग्नमानम् ॥ सा च उग्रगणान्तर्गता । अधोमुखगणान्तर्गता च । विद्यार्थ्यभूमिखनने प्रशस्ता । इति ज्योतिस्तत्त्वम् ॥ तत्र जातफलम् ।

"सदापकीर्त्तिर्हि महापवादो
नानाधिमोदैश्च विनीतकालः ।
जले विलासी चपलः खलः स्यात्
प्राणिप्रणीतो भरणीषु जातः ॥"

इति कोष्ठीप्रदीपः ॥